শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীধন্বন্তর্যষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীধন্ৱন্তর্যষ্টোত্তরশতনামস্তোত্রম্ ॥

ধন্ৱন্তরিঃ সুধাপূর্ণকলশাঢ্যকরো হরিঃ।
জরামৃতিত্রস্তদেৱপ্রার্থনাসাধকঃ প্রভুঃ ॥ 1 ॥

নির্ৱিকল্পো নিস্সমানো মন্দস্মিতমুখাম্বুজঃ।
আঞ্জনেযপ্রাপিতাদ্রিঃ পার্শ্ৱস্থৱিনতাসুতঃ ॥ 2 ॥

নিমগ্নমন্দরধরঃ কূর্মরূপী বৃহত্তনুঃ।
নীলকুঞ্চিতকেশান্তঃ পরমাদ্ভুতরূপধৃৎ ॥ 3 ॥

কটাক্ষৱীক্ষণাশ্ৱস্তৱাসুকিঃ সিংহৱিক্রমঃ।
স্মর্তৃহৃদ্রোগহরণো মহাৱিষ্ণ্ৱংশসম্ভৱঃ ॥ 4 ॥

প্রেক্ষণীযোৎপলশ্যাম আযুর্ৱেদাধিদৈৱতম্।
ভেষজগ্রহণানেহস্স্মরণীযপদাম্বুজঃ ॥ 5 ॥

নৱযৌৱনসম্পন্নঃ কিরীটান্ৱিতমস্তকঃ।
নক্রকুণ্ডলসংশোভিশ্রৱণদ্ৱযশষ্কুলিঃ ॥ 6 ॥

দীর্ঘপীৱরদোর্দণ্ডঃ কম্বুগ্রীৱোঽম্বুজেক্ষণঃ।
চতুর্ভুজঃ শঙ্খধরঃ চক্রহস্তো ৱরপ্রদঃ ॥ 7 ॥

সুধাপাত্রোপরিলসদাম্রপত্রলসৎকরঃ।
শতপদ্যাঢ্যহস্তশ্চ কস্তূরীতিলকাঞ্চিতঃ ॥ 8 ॥

সুকপোলস্সুনাসশ্চ সুন্দরভ্রূলতাঞ্চিতঃ।
স্ৱঙ্গুলীতলশোভাঢ্যো গূঢজত্রুর্মহাহনুঃ ॥ 9 ॥

দিৱ্যাঙ্গদলসদ্বাহুঃ কেযূরপরিশোভিতঃ।
ৱিচিত্ররত্নখচিতৱলযদ্ৱযশোভিতঃ ॥ **10** ॥

সমোল্লসৎসুজাতাংসশ্চাঙ্গুলীযৱিভূষিতঃ।
সুধাগন্ধরসাস্ৱাদমিলদ্ভৃঙ্গমনোহরঃ ॥ **11** ॥

লক্ষ্মীসমর্পিতোৎফুল্লকঞ্জমালালসদ্গলঃ।
লক্ষ্মীশোভিতৱক্ষস্কো ৱনমালাৱিরাজিতঃ ॥ **12** ॥

নৱরত্নমণীক্লৃপ্তহারশোভিতকন্ধরঃ।
হীরনক্ষত্রমালাদিশোভারঞ্জিতদিঙ্মুখঃ ॥ **13** ॥

ৱিরজোঽম্বরসংৱীতো ৱিশালোরাঃ পৃথুশ্রৱাঃ।
নিম্ননাভিঃ সূক্ষ্মমধ্যঃ স্থূলজঙ্ঘো নিরঞ্জনঃ ॥ **14** ॥

সুলক্ষণপদাঙ্গুষ্ঠঃ সর্ৱসামুদ্রিকান্ৱিতঃ।
অলক্তকারক্তপাদো মূর্তিমদ্বার্ধিপূজিতঃ ॥ **15** ॥

সুধার্থান্যোন্যসংযুধ্যদ্দেৱদৈতেযসান্ত্ৱনঃ।
কোটিমন্মথসঙ্কাশঃ সর্ৱাৱযৱসুন্দরঃ ॥ **16** ॥

অমৃতাস্ৱাদনোদ্যুক্ত দেৱসঙ্ঘপরিষ্টুতঃ।
পুষ্পৱর্ষণসংযুক্তগন্ধর্ৱকুলসেৱিতঃ ॥ **17** ॥

শঙ্খতূর্যমৃদঙ্গাদিসুৱাদিত্রাপ্সরোৱৃতঃ।
ৱিষ্ৱক্সেনাদিযুক্পার্শ্ৱঃ সনকাদিমুনিস্তুতঃ ॥ **18** ॥

সাশ্চর্যসস্মিতচতুর্মুখনেত্রসমীক্ষিতঃ।
সাশঙ্কসংভ্রমদিতিদনুৱংশ্যসমীডিতঃ ॥ **19** ॥

নমনোন্মুখদেৱাদিমৌলিরত্নলসৎপদঃ।
দিৱ্যতেজঃপুঞ্জরূপঃ সর্ৱদেৱহিতোৎসুকঃ ॥ **20** ॥

স্ৱনির্গমক্ষুব্ধদুগ্ধৱারাশির্দুন্দুভিস্ৱনঃ।
গন্ধর্ৱগীতাপদানশ্রৱণোৎকমহামনাঃ॥ **21** ॥

নিষ্কিঞ্চনজনপ্রীতো ভৱসংপ্রাপ্তরোগহৃৎ।
অন্তর্হিতসুধাপাত্রো মহাত্মা মাযিকাগ্রণীঃ॥ **22** ॥

ক্ষণার্ধমোহিনীরূপঃ সর্ৱস্ত্রীশুভলক্ষণঃ।
মদমত্তেভগমনঃ সর্ৱলোকৱিমোহনঃ॥ **23** ॥

স্রংসন্নীৱীগ্রন্থিবন্ধাসক্তদিৱ্যকরাঙ্গুলিঃ।
রত্নদর্ৱীলসদ্ধস্তো দেৱদৈত্যৱিভাগকৃৎ॥ **24** ॥

সঙ্খ্যাতদেৱতান্যাসো দৈত্যদানৱৱঞ্চকঃ।
দেৱামৃতপ্রদাতা চ পরিৱেষণহৃষ্টধীঃ॥ **25** ॥

উন্মুখোন্মুখদৈত্যেন্দ্রদন্তপঙ্ক্তিৱিভাজকঃ।
পুষ্পৱৎসুৱিনির্দিষ্টরাহুরক্ষঃ শিরোহরঃ॥ **26** ॥

রাহুকেতুগ্রহস্থানপশ্চাদ্গতিৱিধাযকঃ।
অমৃতালাভনির্ৱিণ্ণযুধ্যদ্দেৱারিসূদনঃ॥ **27** ॥

গরুত্মদ্ৱাহনারূঢঃ সর্ৱেশস্তোত্রসংযুতঃ।
স্ৱস্ৱাধিকারসন্তুষ্টশক্রৱহ্ন্যাদিপূজিতঃ॥ **28** ॥

মোহিনীদর্শনাযাতস্থাণুচিত্তৱিমোহকঃ।
শচীস্ৱাহাদিদিকপালপত্নীমণ্ডলসন্নুতঃ॥ **29** ॥

ৱেদান্তৱেদ্যমহিমা সর্ৱলোকৈকরক্ষকঃ।
রাজরাজপ্রপূজ্যাঙ্ঘ্রিঃ চিন্তিতার্থপ্রদাযকঃ॥ **30** ॥

ধন্ৱন্তরের্ভগৱতো নাম্নামষ্টোত্তরং শতম্।
যঃ পঠেৎসততং ভক্ত্যা নীরোগস্সুখভাগ্ভৱেৎ॥ **31** ॥

॥ ইতি শ্রীধন্ৱন্তর্যষ্টোত্তরশতনামস্তোত্রং সমাপ্তম্ ॥